इति मनुः "दृष्टप्रयोजनानपेक्ष" इति कुल्लू० । अनिन्दिते च "एषोऽनुपस्कृतः प्रोक्त" इति मनुः अनुपस्कृतः अविहित इति कुल्लू० । [भावे न०ब० । तच्छून्ये त्रि० ।

**अनुपस्थान** न० न उपस्थानम् अभावे न०त० । उपस्थाना-

**अनुपस्थाप्य** त्रि० न उपस्थाप्यः । अस्मरणीये । प्रथमान्तपदानुपस्थाप्यत्वादिति जग० ।[भावे, स्मृत्यभावे च ।

**अनुपस्थिति** स्त्री न उपस्थितिः अभावे न०त० । उपस्थित्य-

**अनुपहत** न० न उपहतः भोगच्छेदादिना । सदृशे नवे अभुक्ते वस्त्रे "अनुपहतमतिधवलमिति" काद० । उपघात शून्ये त्रि० । [रचनादिसंस्कार उपाकरणं तद्रहिते ।

**अनुपाकृत** त्रि० उप—आ—कृ—क्त न०त० । मन्त्रैर्यज्ञे पशो-

**अनुपात** पु० अनुरूपः त्रैराशिकेन पातः । पाटीगणितोक्तेन त्रैराशिकेन युक्तसंख्यापाते । "पुरान्तरं चेदिदमुत्तरं स्यात् तदक्षविश्लेषलवैस्तदा किम् ? । चक्रांशकैरित्यनुपातयुक्त्या युक्तं निरुक्तं परिधेः प्रमाणम्" सि०शि०॥"निरक्षदेशः स्वदेशाद्यथा यथा दक्षिणतो भवति तथा तथा स्वस्तिकाद्दक्षिणवद्वृत्तं नतम् तयोरन्तरेऽक्षांशाः । ते च निरक्षदेशजापसारयोजनैरनुपातेनोत्पद्यन्ते । अतः कस्मिंश्चित् पुरेऽक्षांशान् ज्ञात्वा तस्मात् पुरादुत्तरतोऽन्यस्मिन् पुरे ज्ञेयाः । ततस्तेषामन्तरांशैः पुरान्तरयोजनैश्चानुपातः । यद्यन्तरांशैः पुरान्तरयोजनानि लभ्यन्ते तदा चक्रांशैः ३६० किमिति फलं भूपरिधियोजनानि" इति प्रमि० । तदानयनञ्च "प्रमाणमिच्छा च समानजाती आद्यन्तयोः स्तः, फलमन्यजाति मध्ये, तदिच्छाहतमाद्यहृत् स्या"दित्युक्त त्रैराशिकरीत्या अन्तरयोजनसंख्याङ्केन राशिचक्रसंख्या-३६० ऽङ्के गुणिते पुरान्तरयोजनाङ्केन विभक्ते लब्धं परिधिमानसंख्या । पश्चात्पतने च । अनुगतः पातं राहुरूपग्रहभेदम् । पातग्रहानुगते । अनु+पत—णिच् णमुल् । पश्चात्पातयित्वेत्यर्थे अव्य० । किन्तु कर्म्मोपपदेन सह "अमैवाव्ययेनेति" पा० नित्यसमासः "लतानुपातं कुसुमान्यगृह्णादिति" भट्टिः ।

**अनुपातक** न० अनुपातयति नरकं गमयति पत—णिच्—ण्वुल् पातकं ब्रह्महत्यादि तत्सदृशम् प्रा०स० । ब्रह्महत्यादिमहापातकसदृशे वेदनिन्दादिजन्ये पापविशेषे तानि च पञ्चत्रिंशत्प्रकारहेतुकत्वेन तावत्संख्यातानि अनरक्त सादृश्ये तेन पतनहेतुमहापातकतुल्यत्वादस्य अनुपातकत्वमिति प्रा० वि० । तानि च विष्णुना दर्शितानि यथा "यागस्थस्य क्षत्रियस्य वैश्यस्य च, रजस्वलायाश्चान्तर्वत्न्याश्चात्रिगोत्रायाश्चाविज्ञातस्य गर्भस्य शरणागतस्य च घातनं ब्रह्महत्यसमानीति, कौटसाक्ष्यं सुहृद्वध एतौ सुरापानसमौ । ब्राह्मणस्य भूम्यपहरणं निक्षेपापहरणं सुवर्णस्तेयसमम् । पितृव्यमातामहमातुलश्वशुरनृपपत्न्यभिगमनं गुरुदारगमनसमम् । पितृष्वसृमातृष्वसृस्वसृगमनञ्च श्रोत्रियर्त्विगुपाध्यायमित्रपत्न्यभिगमनञ्च स्वसुः सख्याः सगोत्राया उत्तमवर्णायाः कुमार्य्या अन्त्यजाया रजस्वलायाः शरणागतायाः प्रव्रजिताया निक्षिप्तायाश्च ॥ अनुपातकिनस्त्वेते महापातकिनो यथा अश्वमेधेन शुद्ध्यन्ति तीर्थानुसरणेन वा इति"॥ नरकाख्यभिधाय "एतेष्वकृतप्रायश्चित्ता अतिपातकिनः पर्य्यायेण कल्पं पच्यन्ते, मन्वन्तरं तु महापातकिनः, अनुपातकिनश्च, उपपातकिनश्चतुर्युगमिति विष्णु०स० । तथा च महापातकसदृशान्येतानि पातकानि । अन्यान्यपि मनुना संक्षिप्य दर्शितानि यथा "अनृतञ्च समुत्कर्षे राजगामि च पैशुनम् । गुरोश्चालीकनिर्बन्धः समानि ब्रह्महत्यया ॥ ब्रह्मोज्झता वेदनिन्दा कौटसाक्ष्यं सुहृद्वधः । गर्हितानाद्ययोर्जग्धिः सुरापानसमानि षट् ॥ निक्षेपस्यापहरणं नराश्वरजतस्य च । भूमिवज्रमणीनाञ्च रुक्मस्तेयसमं स्मृतम् ॥ रेतःसेकः स्वयोनीषु कुमारीष्वन्त्यजासु च । सख्युः पुत्रस्य च स्त्रीषु गुरुतल्पसमं विदुरिति" ॥

**अनुपातकिन्** त्रि० अनुपातकमस्त्यस्य इनि स्त्रियां ङीप् । अनुपातकयुक्ते "अनुपातकिनस्त्वेते महापातकिनस्तथा" स्मृ० ।

**अनुपातिन्** त्रि० अनुपतति अनुगच्छति अनु+गम—णिनि अनुगामिनि ।

**अनुपान** न० अनु भेषजेन सह पश्चाद्वा पीयते कर्म्मणि ल्युट् । औषधेन सह, तत्पश्चाद्वा पेये मधुगुडादौ । पानस्य जलस्य समीपे अव्ययी० । जलसामीप्ये अव्य० ।

**अनुपाहृत** त्रि० न उपाहृतः । अपराहृते ।

**अनुपुष्प** पु० अनुगतं पुष्पं तद्विकाशस् अत्या०स० । शरवृक्षे तस्य पुष्पेणैव प्रकाशात्तथात्वम् ।

**अनुपूर्ब्ब** त्रि० अनुगतं पूर्ब्बं परिपाटीं गतिस० । यथाक्रमप्राप्ते यथाहान्यनुपूर्ब्बं भवति ऋ० १०,१८,५ "यथावदनुपूर्ब्बशः" इति वर्णानामनुपूर्ब्बशः" इति च मनुः । अनुपूर्ब्ब+शस् । अनुपूर्बशः । "वृत्तानुपूर्ब्बे च न चातिदीर्घे" इति कुमा० "ततोऽनुपूर्ब्बायतवृत्तबाहुरिति" भारविः पूर्ब्बमनुगतौ गोपुच्छाकाराविति मल्लि०, अनुगतः पूर्ब्बम् । पश्चाद्गामिनि त्रि० । आग्नेयः प्रथमो गच्छत्यन्वारब्धो-